International Journal of Sanskrit Research 2015; 1(2): 72-74

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(2): 72-74
© 2015 IJSR
www.anantaajournal.com
Received: 15-011-2014
Accepted: 20-12-2014

डॉ0 स्नेहलता
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

Corresponding Author:
डॉ0 स्नेहलता
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

# स्वप्नवासवदत्तस्य रत्नावली नाटिकायाश्च साम्यवैषम्यगतम् अध्ययनम्, नाट्योभयगत विशिष्टाध्ययनम्।

डॉ0 स्नेहलता

## प्रस्तावना

संस्कृतसाहित्येतिहासे नाट्यकारेषु भासस्य नाम सर्वप्रथममेव गण्यते । तस्य नाट्यरचनासु स्वप्नवासवदत्तं श्रेष्ठतमानाट्यकृति: यां पावकोऽपि दग्धुं न प्रवभुव यथा आह राजशेखर: –

''भासनाटकचक्रेऽपिच्छेकै: क्षिप्ते परिक्षितुम् ।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावक: ।।[1]

उदयनास्याद्धैतिहासिकीं कथामत्राङ्कयति कवि: । श्रीहर्षस्य रत्नावली प्रियदर्शिका चापि इमां कथामाश्रयेते । नाटकेस्मिन् सफलनाटकापेक्षिता: सर्वेऽपि गुणा: प्राप्यन्ते । अस्य घटनाचक्रंमतिकौशलेन कविरगुम्फत, कार्यान्वितेत्रापूर्वो निर्वाहोऽभवत् । येन नाटकमधिकं प्रभावोत्पादकं सञ्जातम् । उदयन: स्वशत्रुं वत्सं जेतुमिच्छति । एतदर्थं मगधस्य राज्ञो दर्शकस्य साहाय्यं अपेक्षितमस्ति करोति वासवदत्ता आत्मानं निगुह्य पद्मावती परिणये तस्य सहाक्षयं करोति । मृता वासवदत्तेति विश्वासे सञ्जाते उदयनो दर्शकस्य भगिनीं पद्मावतीं परिणयति । श्यालकस्य दर्शकस्य साहाय्येन उदयनो वत्सं विजयते । पश्चाद् वासवदत्ता उदयनेन संगच्छते । चरित्रचित्रणेऽपि कवि: रधिक: सतर्को जागरूकश्च । तस्य पात्रसृष्टि: सजीवा व्यक्तित्वयुता च । वासवदत्ता यास्त्यागोऽत्य प्रतिम: पद्मावत्या सार्धं निवसन्ति अपि सा सपत्नीद्वेषेण न सीदति । प्रत्युत सा पद्मावतीपरिणये उदयनस्य प्रच्छन्नरूपेण साहाय्यं करोति ।

भाषायां कवेरसामान्योऽधिकार: प्रतीयते तस्य भाषायामेको विस्मापकश्चमत्कार: । स्वल्पानि वाक्यानि भावगम्भीराणि च सन्ति । भासस्य रचनासु नाट्यकुशलताया विकसिततमं रूपमुपलभ्यते । तस्य मौलिकताऽपूर्वैवास्ते । यद्यपि तदीयकृतिविषया: प्राचीनाख्यानेभ्य उद्धृतास्तथापि तस्य काव्यसृष्टिरद्भुता मौलिका चास्ते । तस्य शैली प्रासादिकी लालित्ययुता च । तस्य शैली व्यञ्जनां वृत्तिमाश्रयति नाभिधम् । भासस्य शब्दलाघवमेव तस्य कलाया: प्राधान्यं वैशिष्ट्यम् । केरलङ्कारप्रेम सीमितं रूचिकरं चास्ते । अलङ्कारा: स्थाने प्रयुक्ता अपूर्वा शोभाभावहन्ति । भासस्य वर्णनाशक्तिरप्रतिमाऽस्ति । प्रकृतिवर्णनं विशदं, सजीवं, संश्लिष्टं चास्ति ।

नाटककारेण हर्षवर्धनेन प्रणीता रत्नावली नाटिका अपि उदयनवासवदत्तयो: प्रणयकथां आश्रित्यसंस्कृत-नाट्यसाहित्ये महनीयं पद्म अलङ्करोति । उभयत्र यौगन्धरायणस्य महता प्रयत्नेन उदयन: लक्ष्यं सिद्धं करोति । नाट्यशास्त्रीय दृष्ट्या स्वप्नवासवदत्तं षष्ठात्मकम् एकं सफलं नाटकमस्ति ।

''अभिगम्यगुणैर्युक्तो धणीरोदात्त: प्रतापवान् ।
कीर्तिकामो महोत्साहस्त्राक्षय्यास्त्राता महीपति: ।

प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायक: ।।
तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम् ।
आद्यन्तमेवं निश्चित्य पञ्चध तद्विभज्य च ।।
खण्डश: सन्धिसंज्ञाश्च विभागानपि खण्डयेत् ।
एको रसोऽङ्गीकर्तव्यो वीर: शृङ्गार एव वा ।।
अङ्गमन्ये रसा: सर्वे कर्यान्निर्वहणेऽदभुतम् ।।[2]

रत्नावली चतुरङ्कौ पेता एका सफला नाटिका अस्ति–

''नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्रास्यान्नायको नृप: ।
स्यादन्त: पुरसंबद्धा संगीतव्यापृताथवा ।
नवानुरागा कन्यात्रनायिका नृपवंशजा ।।
सम्प्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कित: ।
देवी भवेत्पुनर्ज्येष्ठा प्रगल्भानृपवंशजा ।।
पदे पदे मानवती तद्वश: संगमो द्वयो: ।
वृत्ति: स्यात्कैशिकी स्वल्पविमर्शा: सन्ध्य: पुन: ।।[3]

अस्या: कथानकं चतुर्षु अङ्केषु विकसितम् अस्ति । । स्वप्नवासवदत्तस्य नायक: धीरललित कोटिक: अस्ति । रत्नावल्या: नायकोऽपि धीरललितेव अस्ति–

''निश्चिन्तो मृदुरनिशं कलापरो धóीरललित: स्यात् ।''[4]

उभयत्र शृङ्गाररसस्य प्राधान्यम् अस्ति । उभयगता नायिका वासवदत्ता स्वीया पतिव्रता च नायिका अस्ति । उभयत्र देवग्यानां वचनेषु विश्वासं कृत्वा उदयनस्य उत्तकर्षाय यौगन्धरायण: वासवदत्ताया: लावाण्के ग्रामे अग्नौ दग्धा मृता च मृषा अपवादं प्रसारितवान् । स्वप्नवासवदत्ते नायिका वासवदत्ता अवन्तिकाया: वेषे पद्मावत्या: संरक्षणे यौगन्धरायणेन रक्ष्यते । रत्नावल्यां सागरीका रूपेण वासवदत्ताया: पार्श्वे रक्ष्यते । इमं मे स्वसा प्रोषित भर्तृकामामिच्छाम्यत्र भवत्या कञ्चित् कालं परिपाल्यमानाम् । कुत: –

''कार्य नैवार्थैर्नापि भोगेर्न वस्त्रैर्नाहं काषायं वृत्तिहेतो: प्रपन्न: धीरा कन्येयं दृष्टधर्मप्रचारा शक्ता चारित्रं रक्षितुं मे भगिन्या: ।।[5]

स्वप्नवासवदत्ते नाटके वासवदत्ता सामान्यरुपेण निवसति स्वकीय अपूर्व त्यागस्य धैर्यस्य शीलस्य च परिचयं ददाति । स्वप्नवासवदत्तस्य वासवदत्तायां समाधिक् सहिषुणता दृश्यते । रत्नावल्यां वासवदत्ता सागरिकाम् उदयनस्य दृष्ट्या दुरे रक्षति । तयो: मेलनं सा द्रष्टुं न शक्नोति । सागरिकाया: सौन्दर्य दृष्ट्वा उदयन: तां प्रति कदाचित् समाकृष्ट: भवेत् इति शङ्कया सदा सचेष्टा दृश्यते । किन्तु स्वप्नवासवदत्ते वासवदत्ता उदयनपद्मावत्यो: परिणये पुष्पमालां गथनाति । सा पद्मावत्या: शिरोवेदनां श्रुत्वा खिन्ना भवति । तस्या: वेदनां च दुरीं कर्तु प्रयत्ते । ''अहो ! अकरूणा: खल्वीश्वरा मे । विरह पर्युत्सुकस्यार्य पुत्रस्य विश्रमस्थानभूतेयमपि नाम पद्मावत्यस्वस्था जाता । यावत् प्रविशामि । अहो ! परिजनस्य प्रमाद: । अस्वस्थां पद्मावती केवलदीपसहायां कृत्वा परित्यजति । इयं पद्मावत्यावसुप्ता । यावदुपविशामि । अथवान्यासन परिग्रहेणाऽल्पं इव स्नेह: प्रतिभाति ।''[6]

समुद्रगृहे निर्मितां पद्मावत्या: शाय्यां प्राप्य सुप्तं च उदयनं पद्मावतीं ज्ञात्वा तत् पार्श्वे शेते । स्वप्नदृश्ये समुपस्थिते उदयनस्य अपलापं श्रुत्वा वास्तविकतां च ज्ञात्वा रहस्योद्भेदनात् सम्भावनात: सा भिता दृश्यते तत: सा प्रस्थिता किन्तु रत्नावल्यां वासवदत्ता सागरीकां उदयनात् पृथक् कर्तु भूगर्भे निगडितां कारयति । अनेन स्वप्नवासवदत्तस्य वासवदत्तायां दयालुता उदारता धैर्यशीलता च दृश्यन्ते परन्तु रत्नावल्यां वासवदत्ता तादृशी न दृश्यते । रत्नावल्यां यदा वासवदत्ता सागरीकाया: वास्तविकतां जानाति तदा वन्दिकृतां मोक्तुम् (मोचयितुम्) उदयनं कथयति । 'स्वप्नवासवदत्ते' पद्मावती वासवदत्ताया: रहस्योद्घाटनं भूते क्षमां प्रार्थनां कृत्वा अज्ञातावस्थानां कृतमनुचितं व्यवहारं स्मृत्वा स्वकीयाम् अज्ञानतां प्रकटयति ।

नाट्यशास्त्रीय सिद्धान्तानुसारं नाटिकायां धीरललितनायकस्य प्रणयलीलानां चित्रणं भवति अतएव शृङ्गाररसस्य प्राधान्यं भवति । रत्नावली नाटिकायाम् अपि शृङ्गारेव अङ्गीरसोऽस्ति । प्रथमाङ्के वसन्तोत्सवस्य कामार्चनस्य च दृश्यानां योजना शृङ्गारस्य उपयुक्त वातावरणस्य सृष्टिं करोति तथा तत्रापि वासवदत्ताया: च प्रणयस्य शोभनं चित्रणं विहितमस्ति–

''विधायापूर्वपूर्णेन्दुमस्या मुखमभूद् ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलनदु: स्थित: ।।[7]

तदनन्तरम् उदयनस्य तथा सागरिका रत्नवल्या: प्रणयाधारे नाटिका आघृता अस्ति । शृंगारस्य संयोग: विप्रलम्भश्च उभौरत्नावल्यां सफलतया वर्णितौ स्त: । कवि: मानस्य अङ्कनं कर्तुमपि सफलं प्रयत्नं कृतवान् अस्ति ।

स्वप्नवासदत्तेऽपि संयोगविप्रलम्भशृङ्गारयो: सजीवं वर्णनं विद्यते–

''मधुमदकलामदनार्त्ताभि: प्रियाभिरूपगूढ़ा: ।
पादन्यासविषण्णा वयमिव कान्ता वियुक्ता: स्यु: ।।''[8]

वासवदत्ताया: मनोदशाया: अन्तरद्वन्दस्य च मनोवैज्ञानिकं चित्रणं प्राप्यते । वासवदत्ता पद्मावत्या:संरक्षणे स्थित्वा उदयनं च साक्षात् दृष्ट्वा अपि न किञ्चिदपि वदति । उदयनस्य स्वकीयां प्रति प्रगाढ़ं प्रेम स्मृतिं च दृष्ट्वा च सा यदा कदा वक्तुम् इच्छति किन्तु यौगन्धरायणस्य योजनां संस्मृत्य तथा न करोति ।

उपर्युक्त विवेचनेन स्वप्नवासवदत्तस्य रत्नावल्याश्च साम्यं वैशम्यं च स्पष्टी भवत: । नाट्यशास्त्रीय दृष्ट्या रत्नावल्यां नाट्यसिद्धान्तानां पूर्ण परिपालनं कृतमस्ति । स्वप्नवासवदत्ते नाट्यशास्त्रीयसिद्धान्तानां पूर्णतया परिपालनं न दृश्यते ।

**सन्दर्भ:**

1. राजशेखर: काव्यमीमांशा पृ0सं0 3/22-26

2. आचार्यधनञ्जय दशरूपकम् पृ0सं0 6/33-34
3. आचार्यविश्वनाथः साहित्यदर्पणः पृ0सं0 6/270-272
4. तदेव तदेव (विमला व्याख्या) 3/34 पृ0सं0 66
5. भासः स्वप्नवासवदत्तम् 1/19 पृ0सं0 26
6. तदेव तदेव प्रथमोऽङ्कः पृ0 122
7. तदेव तदेव 1/10
8. तदेव तदेव 4/3